ISSN: 2583-5149 | An online refereed and peer reviewed journal | Frequency: Biannual

अभिनवधारा
ABHINAVDHARA
International Journal of Innovation in Indic Studies
www.ijiis-org.com

Vol-3, Issue-2 | July 2024

# रसालंकारध्वनिसम्प्रदायविमर्शः

श्री संदीप कोठारी
जेएनयू पूर्व छात्र
संस्कृतविद्वान् कविः च

## भूमिका

संस्कृतसाहित्यजगति व्यासभासकालिदासप्रभृतयो हि बहवः कवयः बभूवुः । विविधैः कविभिः स्वस्वरचनासु, काव्यादिग्रंथेषु, नाट्यादिग्रंथेषु काव्यादिविषयमादाय स्वानि स्वानि मतानि प्रतिपादितानि। तस्माद्धि संस्कृतसाहित्यमतीव विस्तृतं प्रतिभातीति सर्वविदितम्। अथ साहित्यस्य विविधाः धाराः । तत्र सर्वादौ किं नाम साहित्यमिति प्रश्नप्रंसंगे सहितस्य भावः साहित्यमिति प्रायेण संस्मरन्ति विद्वांसः। किं वा लोके प्रसिद्धम् - साहित्यं समाजस्य दर्पणो भवतीति। अस्तु । अथ साहित्ये प्रायः सर्वप्रथमं काव्यमेव मनसा संस्मर्यते। तत्रादौ किं नाम काव्यमिति प्रश्ने कवेः कर्म एव काव्यमिति वदन्ति विचक्षणाः। स्वरूपतः काव्यं हि त्रिविधं विभज्यते। तद्यथा-

- **गद्यकाव्यम्**
- **पद्यकाव्यम्**
- **चम्पूकाव्यम्**

एतदतिरिच्य स्वभावमाश्रित्यापि काव्यस्य सन्ति इतरभेदाः। ते यथा- दृश्यकाव्यम्, श्रव्यकाव्यम्। अस्तु। अवधेयविषयो हि यदत्र काव्यलक्षणं विविधैः कविभिः भिन्नं भिन्नं प्रोक्तम्। यथा- **वाक्यं रसात्मकं काव्यमिति साहित्यदर्पणे कविराजः विश्वनाथः वक्ति** ।[1] अत्र काव्यलक्षणप्रसंगे रसः इति शब्दस्य प्रयोगो विहितः विश्वनाथेन। इत्थं साहित्ये काव्यलक्षणप्रसंगावसरे विभिन्नैः आचार्यैः किं नाम काव्यमित्याश्रित्य स्वस्वाभिमतलक्षणानि सम्प्रोक्तानि । तथाहि-

1. साहित्यदर्पणः, परिच्छेदः- 1

- **काव्यस्यात्मा ध्वनिरिति आनन्दवर्धनः ।**
- **रीतिरात्मा काव्यस्येति वामनः ।**
- **वक्रोक्तिजीवितं काव्यमिति कुन्तकः।**

एवम्प्रकारेण विभिन्नैः आचार्यैः विविधप्रकारकलक्षणानि प्रोक्तानि । इदमेव काव्यलक्षणमादाय साहित्यजगति षट्काव्यसम्प्रदायानां चर्चा अत्यधिकां प्रसिद्धिं गता। तत्र षट्संख्यकाचार्यैः काव्यस्य स्वरूपं किंवा काव्यस्य लक्षणं किमिति स्वमतानुसारं प्रकटीकृतम्। तेनैव साहित्यजगति षट्सम्प्रदायाः अतीव प्रथन्ते । के च ते षट्सम्प्रदायाः तदत्र प्रदर्श्यते-

- **रससम्प्रदायः- भरतमुनिः**
- **अलंकारसम्प्रदायः- भामहः**
- **ध्वनिसम्प्रदायः- आनन्दवर्धनः**
- **रीतिसम्प्रदायः- वामनः**
- **वक्रोक्तिसम्प्रदायः- कुन्तकः**
- **औचित्यसम्प्रदायः- क्षेमेन्द्रः**

उपर्युक्ताः हि रसादिषट्सम्प्रदायाः संस्कृतसाहित्यजगति भृशम् आद्रियन्ते। एतेषु षट्सम्प्रदायेषु प्रथमत्रयाणां रसालंकारध्वनिसम्प्रदायाणामत्र विमर्शः क्रियते । प्रथमस्तावदयं रससम्प्रदायः-

**मूलविषयप्रस्तुतिः**

**रससम्प्रदायः**

षट्स्वपि सम्प्रदायेषु अयं सम्प्रदायः प्रायेण विद्वद्भिः सर्वप्राचीनतमः स्वीक्रियते। क्वचित् विद्वांसः अलंकारसम्प्रदायमपि सर्वप्रचीनतया स्वीकुर्वन्ति, तथापि अयं सम्प्रदायः भरतमुनिना संस्थापितः सर्वप्रसिद्धः प्राचीनश्च वर्तते इति सर्वविदितं लोकख्यातं च। लोके प्रथमतया भरतमुनिना एव रसशब्दस्य विवेचनं कृतम्। यद्यपि वेदेषु अपि रसशब्दस्य विवरणं प्राप्यते, परं वेदे हि यो रसशब्दः न सः अलंकारशास्त्रमाधृत्य। **दधानः कलशे रसम्**[2] इति ऋग्वेदे रसशब्दः प्रयुक्तः। अयं च रसशब्दः सोमरसः इत्येतस्मिन् अर्थे प्रयुक्तः। एवमनेन लक्ष्यते यत् रसशब्दस्य प्रयोगस्तु पुरा कालादेव क्रियते। एवमेव उपनिषत्सु अपि रसशब्दस्य उल्लेखो दृश्यते। तथा च तैत्तिरीयोपनिषदि- **रसो वै सः, रसं ह्येवायं लब्धानन्दी भवतीति।**[3] अत्र यः रसशब्दः,

[2] ऋग्वेदः 9.63.13

[3] तैत्तिरीयोपनिषद् 11.7.1

सो हि आनन्दवाचकः। इत्थं वेदादिषु रसशब्दस्य प्रयोगे सत्यपि तस्य आलंकारिकसम्प्रदायरूपे प्रयोगाभावात् भरतमुनिरेव रसशास्त्रस्य सम्प्रदायकत्वं बिभर्ति।

अतः अस्य रससम्प्रदायस्य संस्थापको भरतमुनिर्वर्तते इति लोकख्यातिः । भरतिमुनिना सर्वप्रसिद्धः एकः नाट्यग्रंथो विरचितः, यो हि लोके साहित्ये वा नाट्यशास्त्रमिति नाम्ना व्यवह्रियते । नाट्यशास्त्रे एव अस्मिन् भरतमुनिना रससम्प्रदायस्य संस्थापना अपि विहिता। अस्मिन् नाट्यशास्त्रे आहत्य षट्त्रिंशदध्यायाः वर्तन्ते । तत्र भरतमुनिना रसविषये स्वीये नाट्यशास्त्रे रसोत्पत्तिप्रसंगे समुदीरितं यत्- **विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति ।** सूत्रेण अनेन रसस्य निष्पत्तिः कथं जायते इति भरतमुनिना रससम्प्रदाये सुष्ठुतया निगदितम्।

भरतमुनिना रसविषये प्रोक्तं यत् रसः आस्वाद्यो भवति न तु आस्वादः। एवमेव रसः अनुभूतिविषयो वर्तते न तु स्वयमेव अनुभूतिः । रसः विषयगतो भवति न तु विषयीगतः । एवम्प्रकारेण भरतमुनिना काव्यलक्षणप्रसंगावसरे रसस्य महत्ता प्रतिपादिता एवं च रसस्य स्वरूपं प्रकटीकृतम्। ध्यातव्यम् अस्ति यत् भरतमुनिः रसशास्त्रपरम्पराविषये, एतस्याः प्राचीनत्वं वर्णयन् स्वकीये नाट्यशास्त्रे एव षष्ठाध्याये पूर्वाचार्यान् संकेतयति- **एते ह्यष्टौ रसाः प्रोक्ताः द्रुहिणेन महात्मना**[4] इति। इत्थमनेन रसशास्त्रस्य आदित्वं निगद्यते।

रसः कः इति तु सर्वैरेव ज्ञायते। काव्यादिपठनेन काव्यश्रवणादिना वा यः आनन्दः अधिगम्यते, स एव रसः इति सर्वसामान्यानुभवः। पाणिनिव्याकरणानुसारेण रस् आस्वादे इत्यस्मात् धातोः अच् प्रत्यये कृते सति रसशब्दः सिद्ध्यति, यस्यार्थो भवति- रस्यते आस्वाद्यते इति रसः। रस्यते अनेन इति रसः। रसति रसयति वा रसः। रसनं रसः आस्वादः इति। रसो वै सः- इत्यत्र खलु यः रसशब्दः, सः अपि चिन्मयानन्दार्थे एव सम्प्रयुक्तः। अथेदानीं रसः कथमुत्पद्यत इति विषये ज्ञातव्यम्। तद्धि भरतमुनिना उक्तमेव यत्- विभावानां अनुभावानां व्यभिचारिभावानां च संयोगेन रसः निष्पत्तिः भवति इति।

भरतमुनेः रससूत्रमाधारीकृत्य तत्र रसस्वरूपं वर्णयितुकामाः बहवः व्याख्याकर्तारः बभूवुः। एतेषु सर्वेष्वपि व्याख्यातृषु चत्वारः आचार्याः अतीव प्रसिद्धाः। साहित्यशास्त्रे यदा रसविषयणी चर्चा जायते, तदा तेषां नाम सर्वैरेव स्मर्यते। ते खलु- भट्टलोल्लटः, शङ्कुकः, भट्टनायकः, अभिनवगुप्तश्च इति चत्वारः। अत्र प्रथमः भट्टलोल्लटः भरतनाट्यसूत्रस्थस्य रसशब्दस्योपरि व्याख्यां चकार। अस्य भट्टलोल्लटस्य उत्पत्तिवादः प्रसिद्ध्यति। अयमाचार्यः भरतनाट्यसूत्रे **संयोगाद्** इति पदस्य **कार्यकारणभावरूपसम्बन्धात्** एवमर्थं स्वीकरोति। निष्पत्तिरिति शब्दस्य च उत्पत्तिरिति अर्थमाह भट्टलोल्लटः।

---

[4] नाट्यशास्त्रम्- अध्याय.6

एवमेव द्वितीये श्रीशङ्कुकस्य अनुमितिवादः प्रथते। अयमाचार्यः रसः अनुमेयः अस्तीति अङ्गीचकार। अतः परं भट्टनायकस्य भुक्तिवादः रसविषये विशिष्यते। एषः मनुते यत् विभावादयः रसाश्च उपभोगयोग्याः भवन्तीति। अन्ते अभिनवगुप्तस्य अभिव्यक्तिवादः प्रसिद्धिं गतः। अभिनवगुप्तानुसारेण रसः व्यंग्यः वर्तते, यतोहि व्यञ्जनावृत्तिद्वारा एव रसस्य अभिव्यक्तिर्भवति।

**अलंकारसम्प्रदायः**

अलमिति पूर्वकात् कृधातोः करणे भावे च घञ् प्रत्ययेन अलंकारः इति रूपं सिद्ध्यति। अलंकारस्य च सामान्यः अर्थो भवति यत् - अलंक्रियते अनेन इति अलंकारः अथवा अलंकरोतीति अलंकारः । अर्थात् येन काव्यस्य अलंकारः क्रियते, स एव अलंकारः अभिधीयते । साहित्यदृशा अस्य अलंकारस्य च सर्वप्रथमं निरूपणं भामहेन कृतम्। अयम् अलंकारसम्प्रदायः आचार्येण भामहेन प्रतिष्ठापितः। यद्यपि इतः पूर्वं भरतमुनिना अपि अलंकारविषये बहु किमपि प्रोक्तं परं भरतमुनिना रससिद्धान्तः एव प्रामुख्येन अङ्गीकृतः। अतः एव अस्य अलंकारसम्प्रदायस्य प्रवर्तकः भामहः एव स्वीक्रियते। रससम्प्रदायात्परम् अयमेव सम्प्रदायः अतीव प्रसिद्धः महत्त्वपूर्णश्च।

अलंकारसम्प्रदायिनां मते अलंकारं विना काव्यं न काव्यत्वम् याति। तद्यथा उक्तमपि पीयूषवर्षिजयदेवेन-

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलङ्कृती।।**[5]

एवमेव भामहेन अलंकारविषये प्रोक्तं यत् अलंकारः काव्यस्य अद्वितीयं तत्त्वं वर्तते । **न कान्तमपि विभूषणं विभाति वनिता मुखम् इति।** अस्यार्थो हि यत् विभूषणं विना आहोस्वित् अलंकारं विना काव्यं तथैव भवति यथा स्त्रीमुखम् आभूषणं विना । अवधेयास्पदं यत् अलंकाराणां प्रयोगः पुराकालादेव जायमानः वर्तते। वेदेष्वपि अलंकाराणां प्रयोगः यथावसरं कृतः एव। न केवलं प्रयोगः कृतः प्रत्युत अलंकाराणां नामोल्लेखः अपि दृश्यते। तथाहि- **ईयुषीरागमुपमा शाश्वतीनाम्।**[6] एवमेव शतपथब्राह्मणे अपि उपमालंकारस्य नामोल्लेखः कृतः। तद्यथा- **तदप्युपमास्ति।**[7] वेदेषु उपनिषत्सु च अलंकाराणां प्रयोगस्तु प्रायः दृश्यत एव।

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**

**बुद्धिं तु सारथीं विद्धि मनः प्रग्रहमेव च। ।**[8] (कठोपनिषद् )

---

[5] चन्द्रालोकः 1.8

[6] ऋग्वेदः 1.113.95

[7] शतपथब्राह्मणम् 15.41.5

[8] कठोपनिषद् 1.3.3

कठोपनिषदः प्रसिद्धा उक्तिरियमपि उपमालंकारस्य प्रयोगेण समन्विता। एवमेव अन्यान्योपनिषत्सु अलंकाराणां प्रयोगः कृतः अस्ति। ऋग्वेदस्य अयं मंत्रो हि बहु प्रथितः-

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यःअभिचाकशीति।**[9] **(ऋग्वेदः)**
अस्मिन् मंत्रे अतिशयोक्त्यलंकारस्य प्रयोगः दृश्यत एव। एवमेव ऋग्वेदस्य विश्वामित्रनदीसंवादसूक्ते उपमादिविविधालंकाराणां प्रयोगः दृश्यते। यथा- **प्रपर्वतानामुशतीम् उपस्थादश्वे इव विषितेहासमाने। गावेव शुभ्रे मातरारिहाणे विपाट्शुतुद्री पयसा जवेते।।**[10]

**अलंकारविषये अन्याचार्याणां मतानि-**

**दण्डी-** काव्यशोभाकरान् धर्मान् अलंकारान् प्रचक्षते इति दण्डिना प्रोक्तम्। दण्डिना षट्त्रिशंदलंकाराणाम् उल्लेखः कृतः अतिशयोक्त्यलंकारश्च पार्थक्येन स्वीकृतः ।

**आनन्दवर्धनः-** अंगाश्रितास्त्वलंकाराः मन्तव्याः कटकादिवत् । आनन्दवर्धनेन अलंकारेण सह ध्वनेः समावेशो न कृतः। यतोहि तेनोक्तं यत् ध्वनिः विशुद्धतत्त्वं वर्तते काव्यस्य।

**वामनः-** काव्यशोभायाः कर्तारो धर्मा गुणाः इति रीतिसम्प्रदायप्रवर्तकेन वामनेन प्रोक्तम् अलंकारविषये ।

अथ अलंकाराणां का संख्या इत्येतस्मिन् विषये विदुषामाचार्याणां मतानि भिन्नानि दृश्यन्ते। भामहानुसारं अलंकाराणां संख्या षट्त्रिंशत् (36) मन्यते। रुद्रटः अपि भामहसम्मतसंख्यामेव अङ्गीकरोति। आचार्यो दण्डी तु पंचत्रिंशत् (35) अलंकाराणामुल्लेखं विदधाति। अग्निपुराणदृशा तु अष्टावेव अलंकाराः सन्ति। मम्मटाचार्यानुसारेण अलंकाराणां संख्या एकषष्टिरिति मन्यते। कविराजविश्वनाथस्तु नवसप्ततिसंख्यकालंकारान् स्वीकरोति। एवं हि अलंकाराणां संख्याविषये विविधाचार्याणां मतवैविध्यम् आलोक्यते। अत्रालंकारसंख्याविषये स्मरणीयं यत् प्रामुख्येन अलंकाराः द्विविधाः कथ्यन्ते। तथाहि-

1. **शब्दालंकाराः**
2. **अर्थालंकाराः**

एवमुपरि उल्लिखितौ द्वौ भेदावलंकारस्य प्रथितौ। एतदतिरिच्य- उभयालंकाराः इति अलंकारस्य अपरः भेदः अपि प्रोच्यते कैश्चित्। अयं भेदस्तावदय द्वयोः शब्दार्थालंकारयोः मिश्रितत्वात् नातिरिक्ततया परिगण्यते क्वचित्। शब्दालंकारे शब्दमाधारीकृत्य अलंकाराः भवन्ति, तस्मादस्य नाम शब्दालंकारः इत्युक्तम्।

---

[9] ऋग्वेदः- 1.164.20

[10] ऋग्वेदः 3.33.1

अर्थालंकारे अर्थम् आधृत्य अलंकाराः भवन्ति, तस्मादयं भेदः अर्थालंकारनाम्ना व्यपदिश्यते। शब्दालंकारेषु यथा- अनुप्रासालंकारः, यमकालंकारः इत्यादयः प्रसिद्धाः। अर्थालंकारे तु उपमारुपकादिभेदाः अतिप्रसिद्धाः।

**ध्वनिसम्प्रदायः**

ध्वनिसिद्धान्तो हि भारतीयकाव्यशास्त्रे एकः प्रसिद्धः सम्प्रदायो वर्तते । अस्य सम्प्रदायस्य आधारः अर्थध्वनिरेव वर्तते । ध्वनिसम्प्रदायस्य प्रवर्तकः आचार्यः आनन्दवर्धनः वर्तते, परं तथापि आनन्दवर्धनात्पूर्वं ध्वनिविषये नैकैः आचार्यैः वर्णनं कृतम् । आनन्दवर्धनेनापि स्वयं ध्वनिविषये अन्याचार्याणां मतोल्लेखः कृतः । यथाहि-

**काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः । ।**[11]

अत्र हि ध्वनिसम्प्रदायप्रवर्तकेन आचार्यानन्दवर्धनेन काव्यलक्षणप्रसंगे ध्वनेः उल्लेखावसरे पूर्वाचार्याणां नामोल्लेखः विहितः । अनेन स्पष्टीभवति यत् आनन्दवर्धनात्पूर्वमपि ध्वनिविषये अन्यैः आचार्यैः पर्याप्तं प्रोक्तमासीत्। परं प्रमुखतः आचार्यः आनन्दवर्धनः एव ध्वनिसम्प्रदायस्य प्रवर्तकत्वं प्रयाति इति सर्वविदितम् । आनन्दवर्धनात्परम् अभिनवगुप्तेनापि ध्वनिसिद्धान्ते ध्वनेः प्रबलतायै- **ध्वन्यालोकलोचनम्** इति टीकाग्रंथो विरचितः । आभ्याम् आचार्याभ्यां रसस्य ध्वनेश्च महान् संबन्धः प्रकटीकृतः । आचार्यानन्दवर्धनेन रसध्वनिरेव सर्वश्रेष्ठः स्वीकृतः । अनन्तरं मम्मटाचार्येण पुनः ध्वनिसिद्धान्तस्य प्रबलतायै ध्वनिविरोध्याचार्याणां मतं खण्डितम्। तस्मादेव मम्मटाचार्यः- ध्वनिप्रतिष्ठापकपरमाचार्यरूपेणापि साहित्यजगति परिज्ञायते । ध्वनिसिद्धान्तस्यास्य आधारो हि स्फोटसिद्धान्तो वर्तते। इत्थम् आनन्दवर्धनेन काव्यस्यात्मा ध्वनिरिति काव्यलक्षणं संस्थाप्य ध्वनिसम्प्रदायस्य संस्थापना विहिता ।

ध्वनिरिति शब्दो हि ध्वन् इत्यस्माद्धातोः इन् इतिप्रत्यये विहिते सति सिद्ध्यति। अत्र ध्वनिरित्येतस्य शब्दस्य प्रायेण चत्वारो व्युत्पत्तिलभ्यार्थाः विद्यन्ते। तद्यथा- ध्वनति ध्वनयति वा यः सः व्यञ्जकः शब्दः इति प्रथमम्। अत्र ध्वनिरिति पदेन व्यंजकशब्दः एवाभिप्रेतः। अथ द्वितीयः अर्थः व्यंजकार्थे लक्षितः। तद्यथा- ध्वनति ध्वनयति वा यः सः व्यंजकः अर्थः ध्वनिरिति उच्यते। एवमेव व्यंग्यार्थे अपि ध्वनि शब्दः प्रयुज्यते। तत्खलु- ध्वन्यते इति ध्वनि, यत्किमपि ध्वनितं भवति, तदेव ध्वनिरिति पदेनाभिज्ञायते इत्यर्थः। एतदतिरिच्य- ध्वन्यते अस्मिन् इति ध्वनिः इत्यत्र व्यंजनाव्यापारे अर्थे ध्वनिशब्दः व्युत्पद्यते। आचार्यमम्मटस्तु व्यंग्यार्थे एव ध्वनिशब्दम् अभिमन्यते। मम्मटो वक्ति यद्यत्र वाच्यार्थमपेक्ष्य व्यंग्यार्थः अतिशयेनोत्तमः भवति, स एव ध्वनिः निगद्यत इति।

---

[11] ध्वन्यालोक 1.1

ध्वनिसम्प्रदायप्रमुखाचार्येषु आनन्दवर्धनः ध्वनेः भेदद्वयं मन्यते। तदेवम्- प्रथमः लक्षणामूलाध्वनिः, यस्यापरं नाम अविवक्षितवाच्यध्वनिरित्यपि वर्तते। द्वितीयश्च- अभिधामूलाध्वनिः, अस्यापरं नाम विवक्षितान्यपरवाच्यध्वनिरित्यपि अस्ति। ध्वनिसम्प्रदायाचार्येषु- ध्वन्यालोकग्रन्थकर्ता आनन्दवर्धनः, आचार्यमम्मटः, अभिनवगुप्तः, पण्डितराजजगन्नाथः इत्येते प्रमुखाः विद्यन्ते।

**रसांलकारध्वनिसम्प्रदायानां विश्लेषणम्**

काव्यं हि मानवचैतन्यस्य महती सृष्टिर्विद्यते । एषु उपर्युक्तेषु काव्यसम्प्रदायेषु किमुत षट्काव्यसम्प्रदायेषु काव्यस्य एव विश्लेषणं विमर्शो वा क्रियते। काव्यस्य किं लक्षणम् । लक्षणं च कीदृशम्। काव्यस्य कः आत्मा वर्तते। किं च तत्तत्वं यद्विद्यमाने काव्ये काव्यत्वं सन्तिष्ठति, यदविद्यमाने काव्यात् काव्यत्वम् अपसरतीति एवंविधनैकविषयाणां चर्चा क्रियते काव्यसम्प्रदायेषु । काव्यलक्षणप्रसंगावसरे अनेकैः आचार्यैः विविधानि लक्षणानि प्रोक्तानि। तत्र च रसालंकारध्वनिकाव्यसम्प्रदायेषु अपि परस्परं वैमत्यं वैविध्यं वा दृग्गोचरीभवति। यथाहि-

**शब्दार्थौ सहितौ काव्यमिति भामहः ।**[12]

**शब्दार्थौ काव्यम्।**[13]

**शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली।**[14]

**शब्दार्थशरीरं तावत् काव्यमिति- आनन्दवर्धनः।**

एवम्प्रकारेण अन्यैः आचार्यै अपि स्वस्वलक्षणं समुपस्थापितम् । केचित् अलङ्कारं काव्यत्वेन स्वीकुर्वन्ति। अपरे रीतिमेव काव्यत्वेन अङ्गीकुर्वन्ति कैश्चिच्च ध्वनिरेव काव्यत्वेन स्वीकृतः। तत्र वाक्यं रसात्मकं काव्यम् इति विश्वनाथकृतकाव्यलक्षणं साहित्यजगति अत्यन्तं प्रसिद्धं समाद्रियते च । एषु च काव्यसम्प्रदायेषु मिथः मतवैभिन्यं दृश्यते तथापि सर्वेषामपि सम्प्रदायानां काव्यलक्षणं काव्यस्वरूपं वा तत्वतः एकत्रैव अभिमुखीभवति । काव्यं हि रसात्मकं भवितव्यमिति लोके प्रसिद्धम्। एवम्प्रकारेणात्र त्रयाणां काव्यसम्प्रदायनां विवेचनं कृतम्।

**निष्कर्ष:**

---

[12] काव्यालंकारः 1.10

[13] रुद्रट-काव्यालंकारः 2.1

[14] काव्यादर्शः 1.10

एवंरीत्या साहित्यजगति षट्सम्प्रदायानां संस्थापना बभूव । तत्रापि रससम्प्रदायः अलंकारसम्प्रदायः ध्वनिसम्प्रदायश्च अत्यधिकाः प्रसिद्धाः वर्तन्ते । निष्कर्षरूपेण एषां त्रयाणामपि सम्प्रदायानां काव्यलक्षणप्रसंगावसरे परस्परं वैभिन्न्यम् अवलोक्यते । तथापि काव्यात्मभूतत्वेषु वाक्यं रसात्मकं काव्यम् अथवा काव्यस्यात्मा ध्वनिः इत्यादीनि लक्षणानि आवश्यकानि । साहित्यजगति यदि वर्तमाने अपि पश्यामश्चेत् सर्वे अपि सम्प्रदायाः महता आदरेण सह स्वीक्रियन्ते। तत्र रससम्प्रदायः उत अलंकारसम्प्रदायः किं वा ध्वनिसम्प्रदायः, सर्वेषामपि एतेषां प्रसिद्धिः अस्त्येव, अध्ययनाध्यापनादिकं चापि प्रचलत्येव । एवम्प्रकारेण साहित्यसम्प्रदायजगति रसालंकारध्वनिसम्प्रदायानां विवेचनमत्र प्रस्तुतम् ।

## सन्दर्भग्रन्थसूची


- नाट्यशास्त्रम् – भरतमुनिविरचितम्, सम्पादकः पारसनाथद्विवेदी
- ध्वन्यालोकः- आनन्दवर्धनः, सम्पादकः गंगासागररायः
- काव्यालंकारः- भामहविरचितः
- साहित्यदर्पणः श्रीविश्वनाथविरचितः
- ऋग्वेदः (मूलमात्रम्)
- शतपथब्राह्मणम्
- कठोपनिषद्- गीताप्रेस
- चन्द्रालोकः- प्रकाशकः मोतीलाल बनारसीदास
- तैत्तिरीयोपनिषद्- गीताप्रेस (संस्कृत हिंदी)